International Journal of Applied Research 2018; 4(8): 250-251




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2018; 4(8): 250-251
www.allresearchjournal.com
Received: 16-06-2018
Accepted: 20-07-2018

**अमरेश कुमार अमर**
शोधार्थी, साहित्य विभाग, कामेश्वरसिंह संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**अमरेश कुमार अमर**
शोधार्थी, साहित्य विभाग कामेश्वरसिंह संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# नाट्यशास्त्रानुसारेण नाटकस्यसमीक्षणम्

**अमरेश कुमार अमर**

**प्रस्तावनाः**

'छन्दः पादौ तु वेदस्य' इति पाणिनीयशिक्षावचनात् छन्दः अत्रवतो वेदस्य[1] पादात्रस्वरूपम्। यथाहि पादाभ्यामेव शरीरिणो गतिर्भवति तथैव पादरूपेण छन्दसा मन्त्रात्कवेदस्वरूपस्यावगतिः निर्मितः प्रगतिश्च भवति।

'छन्दांसि छादनत्[2] इतियास्कीयनिरूक्तेन छन्दोद्वारा आत्मनश्चछादनमावरणं भवति।' यदेभिरात्मानमाच्छादयन् वेदाः मृत्योबिभ्यतः, तच्छन्दसा छन्दस्त्वम्'[3] इति ब्राह्मणेन छन्दसामावरकत्वं विज्ञायते। यथाहि मृत्योबिभ्यः अधुनातना मानवा अपि छन्दो निबद्धमहामृत्युञ्जयादिमन्त्रद्वारा आत्मनिमाच्छादयन्ति तथैव गाय यादिच्छन्दोमयैर्मन्त्रैः देवाः मृत्योर्बिभ्यतः आत्मतमाच्छादयन् अमराश्चभूवन्। एवं च छाद्यते अनेनेति व्यत्पत्या अन्तर्भावितण्यर्थात् छदिधातोः असन् प्रत्यये छन्दः निष्पद्यते। अथवा चन्दयति आह्नादयति चन्द्यते अनेन वेति व्युत्पत्या चादिधातोः चन्देरादेश्च छः[4] इत्यौणादिके असुनि चकारस्य छत्वे छन्द इति। गोतिलयादिना छन्दसः आह्लादजनकत्वं तु सहृदयानां सुविदितमेव।

एतद्धि छन्दो भगवतो वेदस्य पादरूपमपि भगवतोऽनन्तस्य शिरोभूतमिति श्रीमद्भागवतं प्रतिपदायति[5]। एतेन पद्यात्मकरचनायां छन्दसः प्राधान्यं सुस्पष्टं भवति।

आयार्चदण्डिना 'शीरं तावदिष्टार्थ व्यवछिन्ना पदावली[6] इति काव्यस्वरूपं निपयपता, काव्यस्य पद्यं, मिश्रं चेति भेदत्रयं विद्यात, 'पद्यं चतुष्पदी' इत्येवं– प्रकारेण पद्यं लक्षयता पद्यरुश वृत्तं जातिरिति भेदद्वयं प्रतिपादयचिके। तत्र अक्षर– संख्यात– चरणं वृत्तम् मात्रासंख्यातचरणा जाति[7] रिति छन्दो नियमविधायकैरुच्यते। वैदिकवाङ्मयस्य प्रसिद्धं गायत्रीछन्दस्त्रिपादकम्, लोकेऽपि षट्चरणकं षट्पदी वृत्तं विख्यातमेव। अतः दण्डिनो लक्षणे चतुष्पदीति उपलक्षणमेवेति सुधियो मन्यन्ते। अतएव प्राञ्चः 'छान्दोनियमवद् वाक्य पद्यमि त्यभिधीयते, इत्याहुः। विश्वनाथकविराजोऽपि 'छन्दो–बद्धपदं पद्यम्'[8] इत्येव पद्यस्य स्वरूपं प्रतिपादयामास। अतश्छन्दो नियमबद्धपदमेव पद्यं ननु तत्र पादस्य नियमः। महाकाव्यादौ चतुश्चरणानामेव पद्धनमाधिक्येन साधारणतया पद्यं चतुष्पदीति व्यवहारः प्रामुख्यं भजते।

प्राचीने हि समये पद्यात्मकरचनासु महाकवयः छन्दोनियमपालन प्रधानममन्यन्त। अतएव च वामनाचार्य भिन्नवृत यतिभ्रश्ट विसन्धीनि वाक्यानि इति त्रिविधेषु वाक्यदोषुषु द्वोषद्वयं वृतसम्बन्ध्येव प्रत्यपादयत। तत्र 'स्वलक्षणच्युतवृतं भिन्नवृत्तम्' अर्थात् स्वस्माल्लक्षणात् च्यूतं वृत्तं यस्मिस्तत् स्वलक्ष्द्वाणच्युतुत वृतं वाक्यं भिन्नवृत्तम्। 'विरसविरामं यतिभ्रष्टम् अर्थात् विरसः श्रुतिकटफ विरामो यस्मिस्तत् विरसविरामं वाक्यं यतिभ्रष्टम्। एवं प्रकारेण छन्दोविषयका दोषाः परिगहरणीया इति प्राचामाशयः।

संस्कृतसाहित्य प्राचीनाः कवयोऽपि एतन्नियमस्य यथावत् पालनं कुर्वाणा एव–

> अपि माषं मषं कुर्याच्छन्दोभङ्ग न कारयेत्।'

इत्येवमवोचन्। अत एव छान्दोनियमपालनस्य अनिवार्यतामत्रे कुर्वन्तस्ते व्याकरणाशुद्धिमप्यसहन्त। एतच्च अधोलिखतः कतिपयैरेवोदाहरणैः सुस्पष्टं भवति।

पौराणिकसाहित्ये श्रीमद्भागवतमहापुराणं न केवलं पुराणदृष्ट्या मूर्धन्य–यमानमपि तु सरससुन्दरकाव्यदृष्टयापि तत् पुराणमद्वितीयम्। अत्र यावतां छन्दसां समुचितविधानं परिदृश्यते तत् पौराणिकसाहितये अन्यत्र अप्राप्यमेव। अस्मिंश्च महापुराणे–

> अपि माषं मषं कुर्याच्छन्दोभत्र्न कारयेत्।'

इति सिद्धान्तानुसारेण बहवः प्रयोगा विहिताः सन्ति। तथाहि– 'सत्रे समास भगवान् हृदयशीरषाथो'[8] इत्यत्र वसन्ततिलकाबृत्तमर्यादापरिरक्षणार्थ मेवः हयशीर्षा' इत्यस्य स्थाने 'ह्रयशीर्षा' इत्यस्य स्थाने 'ह्रयशीरषा' इति प्रयुक्तम्' इति प्रयुक्तम्। एवमेव 'जानूरुमध्योर शिरोधरांशाः[9] इत्यत्र 'उरसः' थाने उर' इति, 'मान्धात्रलर्कशतधन्वनुरन्तिदेवाः[10] इत्यत्र 'शतध्न्वन्' 'शतधनु स' इत्यस्य स्थाने 'शतधन्वनु' इति।

'द्रष्ट्रायमः स्नेह कला द्विजानि' इत्यत्र 'द्विजः' इत्यस्य स्थाने 'द्विजानि'[11] इत्यादि। तत्र न केवलं वसन्ततिलकावृते एवं विधाः प्रयोगा उपलभ्यन्ते वत्तन्तरेष्वपि तादृशाः प्रयोगाः प्राप्यन्ते।

तथाहि–

'वर्तमानो वयस्याद्ये तत एतदकारषम्।

इत्यत्र अनुष्टुभि 'अकार्षम् इत्यस्य स्थाने 'अकारषम् इति, 'तस्मिन् बिन्दुसरेऽवात्सीत भगवान् कपिलः किल[12] इत्यत्र 'सरसि' इत्यस्य स्थाने' 'सरे' इति।

''स्वसुतं देवहूत्याह धातुं संस्मरती वचः'[13]।

इत्यत्र 'संस्मरन्ति' इत्यय स्थाने 'संस्मरती' इति, एवं प्रकारेण अनेके प्रयोगाः श्रीमद्भागवते उपलभ्यन्ते।
न केवलं पुराणकारः एवं विधान् आर्षप्रयोगान् अकार्षीत् अपितु कालिदास– प्रभृतयो महाकवयोऽपि छन्दोविधान–नियमानेव प्राधान्येन अत्र्चकिरे। तथाहि कविकुलगुरुः कालिदासः 'तं पातयं प्रथमास पपात पश्चात् इत्यत्र पातयामास' इति व्याकरण नियमानुकुलं शुद्धरुपमनादृत्यापि छन्दोनियमनमेंवान्च–सरत्।

मेनका विश्वासमित्रनाटके–

आनन्दाय रसोर्मिमग्नमनसामासां कविग्रामणी
वृत्तीनां परिशीलनाय यदिदं नाट्यं मया निर्मितम्।
तत्सभ्यान् नवनाटिकामृतरसास्वादावधानश्रमं
याचे काव्यपथप्रयाणपथिकान् बद्धप्रणामाञ्जलिः[14]।
अपि च, अवधीयतां कवेर्याच्ञावचसि–
विघटितकलोऽपि दोषाकलोऽपि विपुल– प्रसादरहितोऽपि।
इन्दुरिव मत्प्रबन्धो, बालोदित इह विलोक्यतां सद्भिः[15]।।
दिवसरजनिजानिग्लानिभाजा मुखेन
स्खलदलसगतैश्च व्यञ्जयन्ती विषादम्।
फलमविकलमक्ष्णोजैत्रमस्तं स्मरस्य
प्रसभमभवदेषा गोचरी लोचनस्य[16]।।

अपि च–

कपोले पाण्डिम्ना पदमुषहितं विस्मृतमिव
स्मितेनास्या हन्त! ग्लपित– विसतुल्या तनुलता
तथाप्यस्यास्तैस्तैर्ललितललिताव्र्यवसितैः
कियदूरे भावी करकिसलये विश्वविजयः[17]।
परमनिर्दयस्य तस्य समाज मलभमाना तद्विरहव्यथामसहमाना च तदभिलाषसंवर्धितेन मनसिजेन कमपि दशाविशेषमानीता। सम्प्रति हि

औदास्यं भजति प्रसाधनविधावाकूतगर्भा गिरस्तास्ता
नाभिदयाति, न प्रियसखी गोष्ठीषु विश्राम्यति।
किन्तुवेकान्त– कपोलपालि– विलुठत्पर्यस्तहस्तोत्पला
तत्संकल्परसैकमग्नहृदया नान्यद् बहिष्चेष्टते[18]।।

अपि च–

कृतं नेत्राम्भोजस्फुरितमधरे क्व स्मितसुधा
जिगीषाभिः सख्याः क्व स कुसुमविन्यासरभसः।
मनो निष्ठाशून्यं नयनमभिसन्धानविधुरं
दिनैरेतावद्भिः शिव शिव। दशेयः मृगदृशः[19]।।

स्थालीपुलाकन्यानेन कतिपयैरेव उपर्युक्तोदाहरणैरिदं निश्चेतु शक्यते यत् प्राचीना महाकवयः पद्यात्मकरचनायां छन्दोनियमस्य यथावत् परिपालनमती वावश्यकममन्यन्त। यतो हि छन्दोभत्र्न पद्यस्य कलेश्वरमेव केवलं विकृतं भवति, कलेवरे च विकृते गलगण्डादियुक्ता कामिनीव सा कविता– कामिनी आपतत एव सहृदय – हृदय मुद्वेजयति। अतश्छन्दोमर्यादा येन केनापि रूपेण परिपालनीयेति तेषां मतम्[20]।
इयन्तु छन्दोविषयिणी प्राचीनपरम्परा। नवीनविचारधारा तु विपरीतैव परिलक्ष्यते। लोकभाषासु पचितानि छन्दोनियम विरहितानि आधुनिकानि पद्यानि गद्यानि वेति संदिह्यते पाठकैः। छन्दोमर्यादापरिपालनाय विषयद्वयमपेक्षितं वर्तते (1) छन्दसां समुचितं ज्ञानम्, (2) विपुल शब्दराशेः परिज्ञानञ्च। इदानीन्तेतेषु येषु कविषु एतद्द्वयस्याभावः ते एव प्राचीनान नवीनान् वा हरिऔधप्रभृतीन कवीन् प्राचीनसरणेरनुसरणात निन्धन्ति[21]। छन्ददोनियमपालने अशक्ताः एव नवीनाः कविब्रुवाः कालिदासानुसारेण कथयन्ति–

'पुराणमित्येव न साधु सर्व
नचापि काव्यं नवमित्यवद्यम् इति।
अतस्ते नवीनामेव पद्धतिमनुमोदन्ते।
नवीनता प्रदर्शनव्याजेन निजाकौशलं निगूहयतो नूतनान् कवीन प्रति अस्माकं विनम्रं निवेदनम्।

**सन्दर्भ ग्रंथ सूचीः**


1. पाणिनीयशिक्षायाम्।
2. निरूक्ते 7/3/12।
3. तत्रैव उद्धृतम्।
4. उणादि सूत्रम् 4/218।
5. छन्दास्यनन्तस्य शिरो गृणान्ति 2/1/31।
6. काव्यदर्शे, प्रथमपरिच्छेदे।
7. पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा। वृतमक्षरसंख्यातं जातिर्मात्राकमता भवेत्।। द्रष्टव्यः शब्दकल्पद्रुमः।
8. साहित्यदर्पणे– 6/302।
9. काव्यालंकारसूत्रवत्तौ 2/2/1
10. तत्रैव 2/2/2।
11. तत्रैव 2/2/3 ।
12. श्रीमद्भागवते 2/7/11।
13. तत्रैव 5/12/5।
14. तत्रैव – 2/7/44।
15. तत्रैव– 2/1/31।
16. तत्रैव– 3/25/5।
17. तत्रैव– 3/25/6।
18. तत्रैव– 2।
19. तत्रैव– 3।
20. तत्रैव– 1/41।
21. तत्रैव– 1/5।